Description—Thick country paper; Devanāgarī characters with पृष्ठमात्राs; very old in appearance; handwriting bold, clear, legible and uniform; borders ruled in double black lines; edges worn out; and slightly moth-eaten; fol. 1 missing; folios numbered in right-hand margins only; red pigment used for colophons etc.; the Ms. contains Adhyāyas 1–12.

Age — Saṁvat 1538

Author — Kātyāyana

Begins abruptly — fol. 2a

..... ख्यास्यामः द्रव्यं देवता यागस्त..... मितरत्समभिव्याहारप्रकरणाभ्यां यजतयश्चाफलयुक्तास्तदंगं यजति etc.

fol. 7b इति कात्यायनयज्ञसूत्रे प्रथमोध्यायः ॥

fol. 17a इति कात्यायनीययज्ञसूत्रे द्वितीयोध्यायः ॥

Ends — fol. 96a

ब्रह्मन्वा ... यच्छेति प्रायणीयेद्यसुत्यामेके प्राप्तकालत्वान्नपूर्वशेषादचोदितत्वाच्च तस्माच्च श्रोभावादग्निमद्येति च प्रायणीयादुत्तरमहाश्वः कालाभावाच्च संपच्छुतेः कालो वचनात्कालो वचनात् ।

इति कात्यायज्ञसूत्रे द्वादशोध्यायः ॥ एयुकोडिका । १५२ ॥ छ संवत १५३८ वर्षे आषाढवदि ६ अपरं ७ दिने भूमे अद्येह श्रीत्रैविद्यमोढज्ञा ... अग्निहोत्रीदुवे - रत्नागरसुतदुवेपठनार्थं ॥ समस्तपुत्रपठनार्थं । भवाडी .. शंकरसुतभवाडीदेवरर्षिकेन पुस्तिका लिखिताः ॥ शुभं भवतु ॥ लेखकपाठकयोः कल्याणं भूयादिति । छ ॥ श्रीः ॥ श्रीः ॥

त्रराडीवोरदुवेकालासुत देवासुतदामोदरसुतरघुनाथसुत वाछडापठनार्थं स्वस्ति भणित्वा—

———

कात्यायनश्रौतसूत्र Kātyāyanaśrautasūtra

No. 118 47 / 1879-80

Size — 10¼ in. by 4⅕ in.

Extent — 164 leaves; 8 lines to a page; 35 letters to a line.

Description — Country paper; Devanāgarī characters with occasional पृष्ठमात्राs: handwriting clear, legible and uniform; borders ruled in two double black lines; red pigment used for verse-numbers and colophons; yellow pigment used for corrections; moth-eaten; edges of some folios slightly worn out; the Ms is divided into two parts; the first part foll. 1–84 contains 1–11 Adhyāyas and the second part foll. 1–80 contains 12–26 Adhyāyas.

Age — Saṁvat 1648

Author — Kātyāyana

Begins — fol. 1*b*

॥ श्रीगणेशाय नमः ॥

अथातोधिकारः ॥

फलयुक्तानि कर्माणि सर्व्वेषामतिर्शषान्मनुष्याणां वारंमसामर्थ्यादंगहीना श्रोत्रियषढशूद्रवर्ज्जं ब्राह्मणराजन्य ... ना॰ श्रुते ... चा विशेषाद्दर्शनाच्च रथकार-स्याधाने नियतं वनाभावादिति वा ...

fol. 84*b* इति कात्यायनसूत्रे एकादशोध्यायः समाप्तः ॥ ज्योतिष्टोमधर्म्मा एकाह-द्वादशाहयोः ॥ संवत् १६४८ समये आषाढवदि ७ गुरुवासरे लिषितं वाराणस्यां जगदीसेन ॥ ॥ श्रीविश्वनाथाय० ॥ ॥ गोपीजनवल्लभाय ॥ ॥ रामकृष्ण ॥ छ ॥ छ ॥

Ends — fol. 79*b*

महाव्रतीये चात्वाले मार्जन॰ शांतिकरणमाद्यंतयोः : स्वाध्यायदर्शनात्स्वा-ध्यायदर्शनात् ॥ ७ ॥

इति कात्यायनसूत्रे षड्विंशोध्यायः ॥ रजुसमासं वक्ष्यामः ॥ संवत् १६४८ वर्षे आषाढशुदि ५ पंचम्यां तिथौ बुधवासरे लिखितं वाराणस्यां जगदीशेन ॥ ॥ श्रीविश्वनाथाय० ॥ श्रीगोपीजनवल्लभाय ॥ रामकृष्ण ॥ छ ॥ श्रीः ॥ छ ॥ श्रीब्रह्मपूर्ण सत्य छे ॥ कालभैरवसत्य छै ॥ चंद्रे लांछनताहीं

माहिमगोरौ षारं जलं सागरे रुध्याश्चंदनपादपावि दवे-जेकृष्णनी पोथी कात्यायनना अध्याय २४ पत्र १५२ संवत १७...

कात्यायनश्रौतसूत्र — Kātyāyanaśrautasūtra

No. 119 — 67 / A/1881-82

Size — 10 in. by 4¼ in.

Extent — 156 leaves; 9 lines to a page· 30-32 letters to a line.

Description — Country paper; Devanāgarī characters; not very old in appearance; handwriting clear, legible and uniform; borders of the first eleven folios only ruled in double red lines; red pigment used for marking; yellow pigment used for corrections; folios numbered in both margins; the Ms. contains Adhyāyas 1-26; complete.

Age — Saṁvat 1838

Author — Kātyāyana

Begins — fol. 1*b*

॥ श्रीगणेशाय नमः ॥ श्रीसरस्वय नमः ॥

अथातोधिकारः । फलयुक्तानि कर्माणि etc as in No. 6/1892-95.

fol, 6*a* इति प्रथमोध्यायः ॥

fol. 13*a* इति द्वितीयोध्यायः ॥ २ छ

Ends — fol. 155*a*

पूर्णाहुतिमाद्यामुत्तमां etc. upto स्वाध्यायदर्शनात्स्वाध्यायदर्शनात् ॥ ७ ॥ छ ॥ as in No. 6/1892-95 followed by श्रीगुरवे नमः ॥ छ ॥ छ ॥

इति कात्यायनसूत्रे षड्विंशतिमोऽध्यायः ॥ श्री ॥ श्री ॥ छ ॥

श्रीसरस्वत्यै नमः ॥ इति संपूर्ण ॥ ॥ श्रीसरस्वत्यै नमः ॥ छ ॥ छ ॥ श्रीसंकष्टदेव्यै नमः ॥ श्री ॥ छ ॥ संवत् १८३८ कार्तिककृष्णः १ भोमवासरे तदिने पुस्तकं संपूर्णं ॥ श्री ॥ छ ॥ इति ब्राह्मणगंगारामेण लिखितं ॥ श्रीगंगादेव्यै नमः ॥ छ श्रीअनपुरनादेव्यै नमः ॥ छ ॥ छ ॥ छ ॥ श्रीदुर्गादेव्यै नमः ॥ छ ॥ छ ॥ छ ॥

Reference — See No. 271/1884-86.

कात्यायनश्रौतसूत्र Kātyāyanaśrautasūtra

No. 120 507/1882–83

Size — 8½ in. by 4⅛ in.

Extent — 35 leaves; 11 lines to a page; 24 letters to a line.

Description — Modern paper; Devanāgarī characters; not very old in appearance; handwriting somewhat careless but clear and legible; borders ruled carelessly in double black lines; red pigment used for marking; yellow pigment used for corrections; folios numbered in both margins; edges extremely worn out and moth-eaten; the Ms. contains Adhyāyas 1–5.

Age — Śaka 1662

Author — Kātyāyana

Begins — fol. 1b

श्री ॥ श्रीगणेशाय नमः ॥

कात्यायनसुत्रप्रारंभा ॥ ॐ अथातोऽधिकारः ॥ फलयुक्तानि कर्माणि etc. as in No. 6/1892–95

fol. 6b इति कात्यायनसूत्रे प्रथमोध्यायः ॥ छ ॥ छ ॥

fol. 13a इति कात्यायनसूत्रे द्वितीयोध्यायः ॥ छ ॥

Ends — fol. 35b

उत नो ब्रह्मन्नविषश्रेष्ट उ ... षु देवहूत्तमः । शन्नः शोचा मरुद्धोमे सहस्रसात्तम इति दश दक्षिणा सहस्रं वा सहस्रं वा ॥ १३ ॥

इति कात्यायनसूत्रे पंचमोध्यायः ॥ प्रथमः पादाः कंडिका ५४ शके १६६२ रौद्र नाम संवत्सरे ॥ आषाढशुद्ध ३ तृतीया चंद्रे तदिनि वैराटक्षेत्रस्थ-माणिकदैवज्ञात्मज-केशवदैवज्ञेन लिखितं ॥ शुभं भवतु ॥ छ ॥ पश्चिज्या संवत्सरे संवत्सरे प्रावृष्या वृतितिमुखयोर्वा गृहेषु मूपाहुति जुहोति चतुगृहीतꣳ स्रुवेण घोरु विष्णवित्याज्यभादाय सतक्षा गच्छति यूपमभि .....

Reference — See No. 71/1884–86.

कात्यायनश्रौतसूत्र Kātyāyanaśrautasūtra

No. 121 364/1883–84

Size — 12⅛ in. by 4 in.

Extent — 206 (94+112) leaves; 5 lines to a page; 40 letters to a line.

Description — Modern paper with watermarks; Devanāgarī characters; new in appearance; handwriting beautiful, clear, legible and uniform; borders ruled in triple red lines and edges in double; red pigment used for marking the portion; yellow pigment used for corrections; folios numbered in both margins; the Ms. is divided into two parts the first part or पूर्वार्द्ध contains Adhyāyas 1–11 and the second part or उत्तरार्द्ध contains Adhyāyas 12–26; separate pagination for each part; complete.

The Ms. copied by one Śivarāma Kṛṣṇa Parkhi.

Age — Saka 1753

Author — Kātyāyana

Begins — fol. 1*b*

श्रीगणेशाय नमः ॥

॥ अथातोधिकारः फलयुक्तानि कर्माणि सर्वेषामविशेषान्मनुष्याणां वारंभसामर्थ्यादंङगहीना श्रोत्रियखं ... शूद्रवर्जं ब्राह्मणराजन्यवैश्याना॰ श्रुते स्त्रीन्वाविशेषाद्दर्शनाच्च रथकारस्याधाने नियतं च नाभावादिति वात्स्यो etc.

fol. 93*b* इति कात्यायनसूत्रे एकादशोध्यायः ॥ इति पूर्वार्द्धं समाप्तमिति ॥ छ शुभं भवतु ॥ छ रामचंद्राय नमः

Ends — fol. 110*b* (204*b*)

महाव्रत्तीये चत्वाले मार्जनं शांतिकरणमाद्यंतयोः स्वाध्यायदर्शनात्स्वाध्यायदर्शनात् ॥ ७ ॥ छ ॥

इति कात्यायनसूत्रे षडविंशतितमोध्याय ॥ छ । छ ॥ शके १७५३ खरनाम संवत्सरे उत्तरायणे शशीऋतौ मासोत्तम पौष कृष्ण ११ मंदवासरे भुलेश्वरसन्निधे मुंबईक्षेत्रे प्रथमप्रहरे समाप्तं ॥ छ ॥ इदं पुस्तकं सखाराम बाबाजी वव्हारे आग्निहोत्री पुणेकरस्येदं ॥ छ ॥ हस्ताक्षर शिवराम कृष्ण पारखि कसबे कडूस हल्लि वस्ती मुकाम मुंबई ॥ ॥ तैलाद्रक्षे ... यत्नेन परिपालयेत् ॥ यथा दृष्टं तथा लिखितं लेखकेनास्ति दूषणं ॥ छ । छ ॥

Reference — See No. 71/1884–86.

———

कात्यायनश्रौतसूत्र Kātyāyanaśrautasūtra

No. 122 365/1883-84

Size — 9½ in by 3½ in.

Extent — 79 leaves; 7–8 lines to a page; 32–36 letters to a line.

Description — Country paper; Devanāgari Characters; not very old in appearance; handwriting small but clear, legible and uniform; borders ruled in double black lines; folios numbered in the right-hand margins only; edges of some folios slightly worn out; yellow pigment occasionally used for corrections; foll. 25, 26, 47, 48 missing; the Ms. contains Adhyāyas 12–26.

Age — Does not appear to be very old

Author — Kātyāyana

Begins — fol. 1b

श्रीगणेशाय नमः ॥

॥ ज्योतिष्टोमधर्मा एकाहद्वादशाहयोस्तद्गुणदर्शनात्प्रथमस्य व्रात्यस्तोमः साद्यः क्रेषु वचनादग्निष्टुत्सु चैके द्वादशाहः सत्रमहीनश्चासत उपयंतीति सत्रलिंगं

fol. 5b इति श्रीकात्यायनसूत्रे द्वादशोध्यायः ॥ १२ ॥

fol. 7b इति श्रीकात्यायनसूत्रे त्रयोदशोध्यायः ॥ १३ ॥ छ

Ends — fol. 83a

सविता प्रथमेहन्निति च प्रत्यहमवकाश्यस्य प्रवृंज्याच्च प्रथमयज्ञे ॥ यावती द्यावापृथिवी इति दधिधर्म्मग्रहणं मयित्यदितिभक्षणं त्विषः संवृगिति च महाव्रतीये ॥ चात्वाले मार्जनꣳ शांतिकरणमाद्यं तयोः स्वाध्यायदर्शनात्स्वाध्यायदर्शनात् ॥ ७ ॥ छ ॥ ॐ षंब्रह्म ॥

॥ इति श्रीमत्कात्यायनसूत्रे षड्विंशतिमोध्यायः ॥ २६ ॥ शुभमस्तु जगतः ॥ ॥ श्रीगणेशाय नमः ॥

पार्थिवे वत्सरे काश्यां श्रीकृष्णतनयेन च ॥
अनंतपाठकाख्यस्यानुजेन लिखितं त्विदं ॥

fol. 83b रामकृष्णसुतशंकरसूनुकृष्णसूनुतनयो निजवंशे ॥
रामकृष्ण इति कीर्त्तिततेजास्तस्य पुस्तकमिदं श्रुतिसारं ॥ १ ॥

पुण्यग्रामनिवास्यनंतपाठकानामिदं कात्यायनसूत्रमुत्तरार्द्धम्

Reference — See No. 71/1884–86.

———

कात्यायनश्रौतसूत्र Kātyāyanaśrautasūtra

No. 123 $\frac{366}{1883-84}$

Size — 8 in by $3\frac{3}{4}$ in.

Extent — 48 leaves· 8 lines to a page; 28 letters to a line.

Description—Country paper; Devanāgarī characters; old in appearance; handwriting careless but bold, clear, and legible; borders ruled in two double black lines; red pigment used for marking; yellow pigment used for corrections; edges worn out; the folios are numbered as 1–6 (Adhyāya 1) and then 1–42 (Adhyāyas 2–5).

Age — Śaka 1545

Author — Kātyāyana

Begins — fol. 1^a

श्रीगणेशाय नमः ॥

अथातोधिकारः फलयुक्तानि कर्माणि etc. as in No. 52/1895–1902

fol. 6^b कात्याय(न)श्रौतसूत्रे प्रथमोध्यायः ॥

समाप्त श्रीरस्तु ॥ श्रीमहाराज ॥ छ ॥

fol. 10^b (16^b) इ(ति)श्रीकात्यायनश्रौतसूत्रे द्वितीयोध्यायः ॥ छ

Ends — fol. 42^a (48^a)

त्वष्टा रूपाणा॰ etc. up to सहस्रं वा सहस्रं वा ॥ १३ ॥ as in No. 52/1895–1902 followed by पंचमोध्यायः समाप्तः कात्यायनसूत्रस्य प्रथमः पादः ॥ कंडिकानि ॥ ५४ ॥ शके १५४५ रुधिरोद्गारिसंवत्सरे दक्षिणायने भाद्रपदशुद्धदशमि पुस्तकं संपूर्ण जाहा ॥ शुभं भवतु ॥ श्रीयज्ञमूर्तिर्जयति श्रीरामा श्रीकृष्ण ॥ छ ॥ छ ॥ छ ॥

Reference — See No. 71/1884–86.

कात्यायनश्रौतसूत्र Kātyāyanaśrautasūtra

No. 124 $\frac{71}{1884-86}$

Size — $7\frac{5}{8}$ in. by $3\frac{1}{4}$ in.

Extent — 18 leaves; 6 lines to a page; 17 letters to a line.

Description—Country paper; Devanāgarī characters; old in appearance; handwriting careless but bold, clear and legible; borders ruled in triple red lines; red pigment used for marking; edges worn out; folios uumbered in both margins; fol. 14*b* blank; the Ms. contains the 2nd Adhyāya of the Pūrvārdha.

Age — Appears to be old

Author — Kātyāyana

Begins — fol. 1*b*

श्रीगणेशाय नमः ॥

पूर्वां पौर्णमासोमुत्तरां वोपवसेत् दश्यान्वाधानमध्वर्युर्यजमानो वा ॥ ममाग्ने वर्चो विहवेष्वस्तु वयं त्वे धानास्तन्वं पुषेम ॥ मह्यं नमंतां प्रदिशश्चतस्रस्त्वयाध्यक्षेण पृतना जयेमेत्याहवनीये समिधमादधाति तूष्णीं द्वितीया ॥ मेवमितरयोर्ग्नौ ॥ etc.

Ends — fol. 18*a*

पू ... स्तान्यपि वृत इद्रवायु विमुचता .. ति तूष्णीं वा संक्ययोद्वासयति प्रियेण धाम्नेति हवींष्षि वेद्यां कृत्वा ध्रुवा असदंनिति सर्वाण्यालभते पाहि मामित्यात्मावमंत्रवावृतो पायनमत्र वावृतोपायनं इति द्वितीयोध्यायः कात्यायनः पूर्वार्धेषु ॥ ८ ॥

References — (1) Mss – A – Aufrecht's Catalogus Catalogorum:– i, 91*a*, 17*b*; ii, 192*b*, 190*a*; iii, 20*a*.

B – Descriptive Catalogues:– I. O. Cat. Nos. 318–19.

(2) Printed Editions:– Ed. by A. Weber with extracts from the commentaries of Karka and Yājñikadeva Berlin and London, Williams and Norgate, 1859.

कात्यायनश्रौतसूत्र Kātyāyanaśrautasūtra

No. 125 19 / 1886-92

Size — 11¾ in. by 5¼ in.

Extent — 27 leaves; 10 lines to a page; 36 letters to a line.

Description — Country paper; Devanāgarī characters with पृष्ठमात्राः; very old in appearance; handwriting bold, clear, legible and uniform; borders ruled in double black lines; red pigment used for marking; edges extremly worn out; slightly moth-eaten; the Ms. contains Adhyāyas 1–5.

Age — Fairly old

Author — Kātyāyana

Begins — fol. 1*b*

॥ ॐ नमः श्रीगणेशाय ॥

॥ ॐ अथातोधिकारः फलयुक्तानि कर्माणि सर्वेषाम ··· षान्मनुष्याणां etc. as in No. 6/1892–95.

fol. 4*b* इति प्रथमोध्यायः समाप्तः ॥

fol. 10*a* इति कात्यायनसूत्रे द्वितीयोध्यायः ॥ छ ॥

Enhs — fol. 27*b*

॥ इति कात्यायनसूत्रे पंचमोध्यायः ॥

॥ पश्विज्या संवत्सरे संवत्सरे प्रावृष्यावृत्तिमुखयोर्वा गृहेषु यूपाहुतिं जुहोति चतुगृहोत॰ स्रुवेण वारुविष्णवित्याज्यशेषमादाय सतक्षा गच्छति यूपमभिमृशत्यन्यामिति ॥ प्राङ्तिष्ठान्नभिमंत्रयते वा पालाशं बहुलपर्णमशुष्काग्रमूर्द्धसकलशाखं मध्याग्रोपनतमव्रणमभावे चेदिरविल्वरौहीतकानू खदिराभावे सोम इतरान् स्रुवेणोपस्पृशति विष्णवेन्वेत्यौषध इति कुश ···

Reference — See No. 71/1884–86.

कात्यायनश्रौतसूत्र Kātyāyanaśrautasūtra

No. 126 $\frac{63}{1887–91}$

Size — 11 in. by 4⅝ in.

Extent — 50 leaves; 10 lines to a page; 42 letters to a line.

Description — Country paper; Devanāgarī characters; old in appearance; handwriting clear, legible and uniform; but handwriting on fol. 2*b* and 50*b* seems to be in a different hand; borders ruled in triple black lines; red pigment used for marking; yellow pigment used for corrections; edges worn out and moth-eaten; the Ms. contains Adhyāyas 1–11.

Age — Appears to be old

Author — Kātyāyana

Begins — fol. 1b

सिद्धिश्रीगणेशाय नमः ॥ श्रीयज्ञपुरुषाय नमः ॥

अथातोधिकारः ॥ फलयुक्तानि कर्माणि सर्व्वेषामविशेषान्मनुष्याणां etc. as in No. 6/1892–95.

fol. 4b इति कात्यायनसूत्रे प्रथमोध्यायः ॥

fol. 9b इति कात्यायनसूत्रे द्वितीयोध्यायः ॥

Ends — fol. 50b

पूर्वेण यूपं परीत्यापरेण चेत्प्रशास्तुर्दक्षिणत आस्ते परेण धिष्ण्यामितरे नेष्टा च विसर्ज्जनस्थिनसंवरः प्रशास्तृधिष्ण्यं वोत्तरेणापवमाने स्वर्ज्जमितरे स्वर्ज्जमितरे ॥ १ ॥ श्रीः ॥ छ ॥

इति कात्यायनकृतश्रौतसूत्रे एकादशोध्यायः ॥ ११ ॥

सर्वाबाधेति मंत्रेण संपुटोय ... दासतः ।
सर्वोपद्रवनाशाय भक्तः शीघ्रतरं पठेत् ॥ १ ॥

इति च मत्कारतरंगिण्यां ॥

पत्रं स्वर्णमयं कार्यमंगुलैस्त्वेकविंशतिः ॥
माषैः खरसमिदुश्च ज्ञेयं तंत्र विदो विदुः ॥ २ ॥

निष्कं सुवर्णपाठे च प्रत्येकं दक्षिणां दिशेत् ॥
भोजयेच्च शतं विप्रान् भक्ष्यभोज्यैः पृथक्विधैः ॥ ३ ॥

यत्र दिङ्नियमो नास्ति जपहोमादिकर्मसु ॥
तिस्रस्तत्र दिशः प्रोक्ता ऐंद्री सोम्यापराभिता ॥ ३ ॥

Reference — See No. 71/1884–86

कात्यायनश्रौतसूत्र — Kātyāyanaśrautasūtra

No. 127 — 6 / 1892–95

Size — 8¼ in. by 5¾ in.

Extent — 146 leaves; 12 lines to a page; 25–28 letters to a line.

Description — Thick country paper; Devanāgarī characters; not very old in appearance; handwriting clear, legible and uniform;

...15

yellow pigment occasionally used for corrections; folios numbered in both margins; moth-eaten in the left-hand margins of foll. 132–146; complete.

The Ms. contains Adhyāyas 1–26.

Age — Saṁvat 1862

Author — Kātyāyana

Begins — fol. 1*b*

॥ श्रीगणेशाय नमः ॥

अथातोधिकारः फलयुक्तानि कर्म्माणि सर्वेषामविशेषान्मनुष्याणां वारंभसामर्थ्यादगहीनाश्रोत्रियषंढशूद्रवर्जं ब्राह्मणराजन्यवैश्याना श्रुतेः स्त्री चाविशेषादर्शनाच्च etc.

fol. 7*a* इति कात्यायनसूत्रे प्रथमोध्यायः

fol. 13*a* द्वितीयोध्यायः ॥

Ends — fol. 146*b*

यावती द्यावापृथिवी इति ... दधिधर्मग्रहणं मयि त्यदिति भक्षणं त्विषः संवृगिती महाव्रतीये चात्वा ... मार्जनं शांतिकरणमाद्यंतयोः स्वाध्यायदर्शनात्स्वाध्यायदर्शनात् ॥ ७ ॥ ॥ इति कात्यायनश्रौतसूत्रे षड्विंशतितमोध्यायः ॥

कात्यायनश्रौतसूत्र समाप्तः ॥ शुभं भवतु ॥ वर्षे शाके १७ ॥ ... मि आश्वनशुक्ल २ संवत् १८६२ ॥ श्रीरामस्ही ॥

Reference — See No. 71/1884–86.

कात्यायनश्रौतसूत्र — Kātyāyanaśrautasūtra

No. 128 — 11 / 1895–98

Size — 7¼ in. by 4⅓ in.

Extent — 89 leaves; 10 lines to a page; 25 letters to a line.

Description — Thin country paper; Devanāgarī characters; not very old in appearance; handwriting clear, legible and uniform; borders of the first 25 folios ruled in double red lines and the edges also in double red lines; folios numbered in the right-hand margins only; red pigment very rarely used; the Ms. contains the पूर्वार्द्ध Adhyāyas 1–11.

Age — Śaka 1762 (1722)?

Author — Kātyāyana

Begins — fol. 1b

श्रीगणेशाय नमः ।

अथातोऽधिकारः फलयुक्तानि कर्म्माणि etc. as in No. 6/1892–95.

fol. 7b इति कात्यायनसूत्रे प्रथमोध्यायः

fol. 16b इति कात्यायनसूत्रे द्वितीयोध्यायः समाप्तः ।।

Ends — fol. 89b

पूर्वेण यूपं परीत्यापरेण चेत्प्रशास्तुर्दक्षिणत आस्ते परेण धिदम्यानितरे ने... ष्टा चविसꣳस्थितसंचरः प्रशास्तृधिष्ण्यं चोत्तरेणा पवमाने स्वꣳस्वमितरे स्वꣳस्वमितरे ।। १ ।।

इति कात्यायनसूत्रे एयादशोध्यायः । ११ । इति पूर्वार्द्धं समाप्तः । ॐ ज्योतिष्टोमधर्मा एकाहद्वादशाह ॥ सके १७०२२ रौद्रनामसंवत्सरे आषाढे मासे सिते पक्षे द्वितीयायां इंदुवासरे तद्दिने लिखितं ग्रंथं कुलदेव्या प्रसादतः ॥ छ छ छ

Reference — See No. 71/1884–86.

कात्यायनश्रौतसूत्र — Kātyāyanaśrautasūtra

No. 129 — 52 / 1895–1902

Size — 9¼ in by 5⅛ in.

Extent — 34 leaves; 10 lines to a page; 25 letters to a line.

Description — Thick country paper; Devanāgarī characters; old in appearance; handwriting bold, clear, legible and uniform; folios numbered in right-hand margins only; leaves slightly brittle; the Ms. contains Adhyāyas 1–5.

Age — Appears to be old

Author — Kātyāyana

Begins — fol. 1b

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥ श्रीकात्याय नमः ।। ॐम् ॥

अथत्तोधिकारः फलयुक्तानि कर्माणि सर्वेषा भविशेषान्मनुष्याणां वारंभसामर्थ्याऽदंगहीनाश्रोत्रियषंढशूद्रवर्ज्यं ब्राह्मणराजन्यवैश्याना॰ श्रुतेः etc.

fol. 12[b] इति कात्यायनसूत्रे द्वितीयोध्यायः ॥ २ ॥

Ends — fol. 34[a]

त्वष्टा रूपाणी॰ रूपकृद्रूपपती रूपेण पशूनमस्मिन्यज्ञे मयि दधातु स्वाहेति वा राजौ संयाज्य सहस्रवत्यौ वा नू नो रास्व सहस्रवत्तोकवसुष्टिमद्वसु ॥ द्युमदग्नेसुवीर्यं वर्षिष्ठमनुपक्षितं ॥ उत नो ब्रह्मन्नविष उक्थेषु देवहूतमः ॥ शग्नः शोचा मरुद्भ्योग्ने सहस्रसातभ इति दश दक्षिणा सहस्रं वां सहस्रं वा ॥ ॥ १३ ॥

इति कात्यायनीये श्रौतसुत्रे पंचमोध्यायः समाप्तः ॥ ६ ॥ छ ॥ छ ॥ श्रीकृष्णार्पणमस्तु ॥ श्रीरामचंद्रार्प(ण)मस्तु

Reference — See No. 71/1884–86.

कात्यायनश्रौतसूत्र Kātyāyanaśrautasūtra

No. 130 $\frac{41}{1919-24}$

Size — $8\frac{3}{8}$ in. by $4\frac{1}{5}$ in.

Extent — 118 leaves; 8 lines to a page; 22 letters to a line.

Description — Country paper; Devanāgarī characters; old in appearance; handwriting clear, legible and uniform; borders ruled in double black lines; red pigment used for marking; yellow pigment used for corrections; folios numbered in right-hand margins; moth-eaten; the Ms. contains Adhyāyas 12–26.

Age — Saṁvat 1678

Author — Kātyāyana

Begins — fol. 1[b]

श्रीगणेशाय नमः

ज्योतिष्टोमधर्माऽएकाहद्वादशाहयोः ॥ तद्गुणदर्शनात्प्रथमस्य व्रात्यस्तोमसाद्यष्कृषु वचनादग्निष्टुत्सु चैके द्वादशाहः सत्रमहीनश्चासत उपयंतीति सत्रलिंगं etc.

fol. 7[a] इति कात्यायनसूत्रे द्वादशोध्यायः ॥ १२ ॥

fol. 10[b] इति कात्यायनसूत्रे त्रयोदशोध्यायः ॥ १३ ॥

Ends — fol. 118a

सविता प्रथमेहन्नतिपप्रत्यहमवकाश्यस्य प्रवृंज्यान्न प्रथमयज्ञे यावती द्यावापृथिवी इति दधिधर्म्मग्रहणं मयि त्यदिति भक्षणत्विष ... गिति महाव्रतीये चत्वाले माजन॰ शांतिकरणमा...कयोः स्वाध्यायदर्शनात्स्वाध्यायदर्शनात् ॥ ७ ॥

इति कात्यायनसूत्रे षट्विंशोध्यायः ॥ २६ ॥

कात्यायनसूत्र समाप्ता ॥ श्रीः ॥

संवत् ॥ १६ ॥ ७८ वर्षे कार्तिकमासे कृष्णपक्षे द्वितियायां तिथौ शनिवासरे लीषितं वृदावतिस्थित् चोविशाज्ञातिभट्टविश्वनाथतत्पुत्रेन लिषितं भटगंगाराम श्रीराम

Reference — See No. 71/1884–86.

कात्यायनश्रौतसूत्र-पद्धति (अग्निष्टोमपद्धति)

Kātyāyanaśrautasūtra-paddhati (Agniṣṭomapaddhati)

No. 131

76
1891–95

Size — 8½ in. by 3⅞ in.

Extent — 91 leaves; 11 lines to a page; 40 letters to a line.

Description — Country paper; Devanāgarī characters; old in appearance; handwriting small and closely written but clear, legible and uniform; borders ruled in double black lines; red pigment used for marking colophons etc.; yellow pigment used for corrections; folios numbered in right-hand margins; edges slightly worn out; the Ms. contains Adhyāyas 7–10 of Kātyāyanasūtrapaddhati.

Age — Saṁvat 1685

Author — Devayājñika, son of Prajāpati

Begins — fol. 1b

॥ ॐ नमो गणपतये नमः ॥

अथाग्निष्टोमस्य पद्धतिर्लिख्यते ॥

स्वकाले कृताधानस्य पूर्वं दर्शपूर्णमासाभ्यां यागः । तदनंतरं त्रिकृत्रिभूता इष्टिपशुसोमयागा भवंति । न ततः प्राक् । अग्निहोत्रहोमस्तु प्रागपि दर्शपूर्ण-

मासाभ्यां भवत्येव। यजते रेव निषेधात् ॥ अग्निहोत्रांतभूता नैमित्तिक्य इष्टयश्च भवंति ॥ etc.

fol. 18a महाया० श्रीप्रजापतिसुतया० देवकृतायां कात्यायनसूत्रपद्धतौ सप्तमोध्यायः ॥

fol. 43b इति श्रीत्रिरग्निचित्संब्राट्स्थपतिमहायाज्ञिक - श्रीप्रजापतिसुत - याज्ञिक-श्रीदेवकृतायां कात्यायनसूत्रपद्धतौ अष्टमोध्यायः ॥

fol. 70a इति या० । देवकृतायां सूत्रपद्धतौ नवमोध्यायः ॥

Ends — fol. 91a

अस्याग्निष्टोमस्य समृद्धये यथा संपन्नेन भोजनं पर्याप्तेनान्नेन सहस्रं ब्राह्मणनहं तर्पयामीति । ततो मांगल्यं । तदानीमेव पुनरुद्धृत्य स्वयमेवाग्निहोत्रहोमः प्रातर्होमस्तु स्वकाल एव । तत ऊर्द्धं संध्यातर्पणवैश्वदेवादि नित्यक्रिया नातःप्राक् ॥

॥ इति याज्ञिक श्री श्री श्री देवकृतायां कात्यायनसूत्रपद्धताग्निष्टोमः समाप्तः ॥ श्रीरस्तु ॥

यादृशं पुस्तके ..... यत्नेन परिपालयेत् ॥ छ ॥ श्रीः ॥ शुभं भवतु ॥ झ ॥ कल्याणमस्तु ॥ छ ॥ श्रीरस्तु ॥ छ ॥ श्रीः ॥ छ संवत् १६८५ वर्षे फागुण व ५ सो अद्येह श्रीवाराणसीवास्तव्य ..... पठनानार्थं पुस्तकं लिखितं ॥ छ ॥ श्री ॥ छ ॥ श्री ॥ छ ॥

कात्यायनश्रौतसूत्र-पद्धति (दर्शपौर्णमासपद्धति)

Kātyāyanaśrautasūtra-paddhati (Darśapaurṇamāsapaddhati)

No. 132 — 92 / A1881–82

Size — 12⅛ in. by 4⅕ in.

Extent — 19 leaves; 12–13 lines to a page; 45–50 letters to a line.

Description — Modern paper with water-marks; Devanāgarī characters; new in appearance; handwriting clear, legible and unform; red pigment used for marking; yellow pigment used for corrections; folios numbered in right-hand margins; the Ms. contains Adhyāyas 2 and 3.

Age — Śaka 1714

Author — Yājñikadeva

Begins — fol. 1b

श्रीगणपतये नमः ॥

अथ दर्शपौर्णमासयो पद्धतिर्लिख्यते ॥

कृताधानस्याधानानंतरं प्रथमपौर्णमास्यां मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं ॥ ततो मुख्यायामेव पौर्णमास्यां सद्योन्वारंभणीयेष्टिः ॥ तदनंतरं पौर्णमासस्यारंभः etc.

fol. 11b इति श्रीअग्निचित्संम्राट्स्थपतित्रिंशत्क्रतुकृन्महायाज्ञिकश्रीप्रजापतिसुतं याज्ञिकदेवकृतायां कात्यायनसूत्रपद्धतौ द्वितीयोध्यायः ॥ २ ॥ छ ॥ छ ॥ छ ॥

Ends — fol. 19a

ब्रह्मवरणानंतरं येन मार्गेण स्वासनं प्रत्यागतो भवति आहवनीयं पूर्वेण वाऽपरेण वा तेनैव मार्गेण प्रत्यागत्यय नमः कृतायेति स्वाहाकारांतेन मंत्रेणाहनीये प्रादेशमात्रीं समिधमादधाति । अथवा स्थाल्याः सकृद्गृहीतेन जुह्वा अनेनैव मंत्रेण जुहोति ॥ अथवा अनेनैवाहवनीयमुपतिष्ठते ॥ इति पौर्णमासेष्टिः समाप्ताः ॥ ८ ॥

इति श्रीत्रिरग्निचित्सम्राट्स्थपतिमहायाज्ञिकश्रीप्रजापतिसुतयाज्ञिकदेवकृतानां कात्यायनसूत्रपद्धतौ तृतीयोध्यायः ॥ छ

रूपकालोनुनिर्वापो देवताश्रपणं हविः ॥
आदौ ये विधृताः पक्षाः स्त इमे सर्वदा मृताः ॥ १ ॥

स्वस्ति श्रीमन्नृपशालिवाहनशके १७१४ परिधावनाब्दे उदगयने ग्रीष्मऋतौ आषाढमासे वद्यपक्षे सप्तमी भौम्यवासरे शुभनक्षत्रे शुभयोगे शुभकर्णसुमुहूर्ते इदं पुस्तकं समाप्तः ॥ श्रीरस्तु ॥ श्रीयज्ञेश्वरार्पणमस्तु ॥ छ ॥ छ ॥

कात्यायनश्रौतसूत्र-पद्धति
(दर्शपौर्णमासपद्धति)

Kātyāyanaśrautasūtra-paddhati
(Darśapaurṇamāsapaddhati)

No. 133

528
1882–83

Size — 8⅜ in. by $4\frac{1}{16}$ in.

Extent — 40 leaves; 9 lines to a page; 30 letters to a line.

Description — Modern paper with water-marks; Devanāgarī characters; new in appearance; handwriting clear legible and uniform; borders ruled in single black lines; red pigment used for marking; folios numbered in both margins; edges of some

folios slightly worn out and moth-eaten; the Ms. contains Adhyāyas 2 and 3 of Kātyāyanasūtrapaddhati.

The Ms. copied by one Gangādharadaivajña son of Nārāyaṇadaivajña.

Age — Śaka 1667

Author — Yājñikadeva, son of Prajāpati

Begins — fol. 1*b*

॥ श्रीगणपतये नमः ॥

अथ दर्शपौर्णमासयोः पद्धतिर्लिख्यते ॥

कृताधानस्याधानानंतरं प्रथमपौर्णमास्यां मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं ॥ ततो भुभ्युदस्यायामेव पौर्णमास्यां सद्योन्वारंभणीयेष्टिः ॥ तदनंतरं पौर्णमासस्यारंभः । etc.

fol. 23*a* इति श्रीअग्निचित्संम्राट्स्थपतिर्त्रिंशत्क्रतुकृन्महायाज्ञिकश्रीप्रजापतिसुतयाज्ञिकदेवकृतायां कात्यायनसूत्रपद्धतौ द्वितीयोध्यायः ॥ २ ॥

Ends — fol. 39*b*

अथवा स्थाल्याः सकृद्गृहीतेन जुह्वा अनेनैव मंत्रेण जुहोति ॥ अथवा अनेनैवाहवनीयमुपतिष्ठते ॥ इति पौर्णमासेष्टि समाप्ता ॥ ८ ॥ छ ॥ इति श्रीत्रिरग्निचित्सम्राट्स्थपति-महायाज्ञिकश्रीप्रजापतिसुतयाज्ञिकदेवकृतानां कात्यायनसूत्रपद्धतौ तृतीयोध्यायः ॥ छ ॥

स्वस्ति श्रीमन्नृपशालिवाहनशके १६६७ क्रोधनाब्दे श्रावणमासे सुदि २ शुक्रे तदिनी श्रीमद्विराजनगरस्थनारायणदैवज्ञात्मजगंगाधरदैवज्ञेन लिखितमिदं ॥ श्रीरस्तु ॥ श्रीयज्ञेश्वरार्पणोस्तु ॥ छ ॥ इदं पुस्तकं रामदैवज्ञैबालदीक्षितोऽयाचिता यदत्तमस्ति ॥

कात्यायनश्रौतसूत्र-पद्धति
(पौर्णमासेष्टि)

Kātyāyanaśrautasūtra-paddhati
(Paurṇamāseṣṭi)

No. 134

25(2)
1886-92

Size — 8⅓ in. by 4¾ in.

Extent — 24 leaves; 9 lines to a page; 25 letters to a line.

Description — Country paper; Devanāgarī characters; not very old in appearance; handwriting bold, clear, legible and uniform; folios numbered in right-hand margins; the Ms. contains the third Adhyāya only.

Age — Saṁvat 1868

Author — Yājñikadeva

Begins — fol. 1b

श्रीगणेशाय नमः ।

अथाध्वर्युर्होतुरासनं ... दर्भास्तृतं गार्हपत्याहवनीययोरंतरालदेशस्य मध्यभागे वेदेः पश्चादथवा वेदिश्रोणिमुत्तरेण स्थापयित्वा...हि होतरिति होतुरामंत्रणं करोति ॥ ततो होतर्याचम्यागते सति अध्वर्युः इध्मादेकां समिधमादाय होतारं प्रति अग्नये समिध्यमानायानुब्रूहीति ब्रवीति होता च ब्रह्मत्सामिधेनीरनुवक्ष्यामि इति ब्रह्माणं पृच्छति ॥ etc.

Ends — fol. 24a

अथवा स्थाल्याः सकृद्गृहीतं जुह्वा अनेनैव मंत्रेण जुहोति ॥ अथवा अनेनैव आहवनीयमुपतिष्ठते ॥ ॥ अष्टमी कंडिका ॥ इति पौर्णमासेष्टिः ॥ संवत् १८६८ चैत्रकृष्ण ७ सौरौ दीक्षितसदाशंकरतनुजेन भद्रशंकरेणालेखि ॥ शिवमस्तु ॥

कात्यायनश्रौतसूत्र-पद्धति निरूढपशुबन्धपद्धति

Kātyāyanaśrautasūtra-paddhati Nirūḍhapaśubandhapaddhati

No. 135

86
A/1881-82

Size — 11⅝ in. by 4¾ in.

Extent — 22 leaves; 9 lines to a page; 36 letters to a line.

Description — Country paper; Devanāgarī characters; not very old in appearance; handwriting bold, clear, legible and uniform; red pigment used for marking; yellow pigment used for corrections; folios numbered in both margins; modern paper used for foll. 16–22; borders of these folios ruled in double red lines; the Ms. contains Kaṇḍikās 1–10.

Age — Not very old

Author — Yājñikadeva, son of Prajāpati

Begins — fol. 1*a*

॥ श्रीगणेशाय नमः ॥

अथ निरूढपशुबंधस्य पद्धतिर्लिख्यते ॥

स च इन्द्राग्निदेवतो वा सूर्यदेवतो वा प्रजापतिदेवतो वा प्रतिवर्षे वर्षास्वृतौ श्रावण्यादिचतुर्णां पर्वणां मध्ये अन्यतर(म)स्मिन् भवति ॥ अथवा दक्षिणायनदिने उत्तरायणदिने ॥ अस्मिन्पक्षे एकस्मिन्वर्षे पशुद्वयं भवति ॥ तत्र प्रथमप्रयोगे मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं । etc.

fol. 20*b* अन्यत्प्रैषादिकमूह्यं । ऐंद्राग्नादीनामादिविकल्प इति केचित् । नेत्यपरे ॥

इति श्रीयाज्ञिकदेवकृतायां कात्यायनसूत्रपद्धतौ निरूढपशुबंधः ॥

Ends — fol. 22*b*

यत्पाकयज्ञेषु कथमपि न भवंतीति त एव विदुः ॥ जैमिनिमते सर्वाः शतरुद्रिया जुहोतयो पूर्वाऽएव भवंति न दर्शपूर्णमासधर्मकाः ॥ १० ॥ दशमी कंडिका ॥

इति श्रीत्रिरग्निचित्संभ्राट्स्थपतिमहायाज्ञिक - श्रीप्रजापतिसुतयाज्ञिक-श्रीदेवकृतायां कात्यायनसूत्रपद्धतौ षष्ठोध्यायः ॥ छ ॥ ग्रंथसंख्या ॥ ४०० ॥ शुभमस्तु ॥

श्रीगणेशाय नमः ॥ अथाग्निष्टोमस्य पद्धतिर्लिख्यते ॥ स्वकाले कृताधानस्य पूर्वं दर्शपूर्णमासाभ्यां यागः ॥ तदनंतरं विकृतभूता इष्टिपशुसोमयागा भवंति । न ततः प्राक् । अग्निहोत्रहोमस्तु प्रागपि दर्शपूर्णमासाभ्यां भवत्येव । यजतेरेव निषेधात् । अग्निहोत्रांगभूता नैमित्तिक्य इष्टयश्च भवंति सोमयागार्थं संभृतधान्यघृतदक्षिणादिसंभारस्य सोमयागचिकीर्षया सोमयागसंनिधौ कृताधानस्य सोमया .....

कात्यायनश्रौतसूत्र-पद्धति

Kātyāyanaśrautasūtra-paddhati

No. 136

87
A/1881–82

Size — 12¾ in. by 5⅝ in.

Extent — 220 leaves; 10–11 lines to a page; 35 letters to a line,

Description — Country paper; Devanāgarī characters with occasional पृष्ठमात्राः; handwriting bold, clear, legible and uniform; borders

ruled in double black lines; red pigment used for marking; yellow pigment used for corrections; edges of some folios slightly worn out; foll. 216–224 missing; incomplete.

Age — Does not appear to be very old

Author — Padmanābha

Begins — fol. 1b

॥ ॐ नमो विघ्नराजाय ॥

विघ्नराजं नमस्कृत्य देवीं सरस्वतीं तथा ।
शिष्याणामुपकाराय लिख्यते श्रौतपद्धतिः ॥

कृताधानस्य प्रथमपौर्णमास्यां मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं ।
ततोन्वारंभणीया प्रतिपदि पुनःस्वरस्थानेतिलेपः ॥ etc.

Ends — fol. 229b

संवृगिति महाव्रतीये भक्षणं चात्वाले मार्जनं । शांतिकरणमुक्तं तत्रैव । ऋचं वाचमित्यध्यायः ॥

विद्वज्जनविनोदाय । कातीयसूत्रमध्यतः
शिष्याणामुपकाराय लिखिता पद्धतिर्मया ॥

इति कात्यायनसूत्रपद्धति समाप्तः । ग्रंथ संख्या ६१५०

References — Mss. – A – Aufrecht's Catalogus Catalogorum :– i, 91a.
B – Descriptive Catalogues :– Bikaner Catalogue No. 311.

कात्यायनश्रौतसूत्र-पद्धति

Kātyāyanaśrautasūtra-paddhati

No. 137 — 367 / 1883-84

Size — 11⅝ in. by 4⅝ in.

Extent — 305 leaves; 5 lines to a page; 32–38 letters to a line.

Description — Modern paper with water-marks; Devanāgarī characters; new in appearance; handwriting beautiful, clear, legible and uniform; borders of some folios ruled in double red lines and of some in two double red lines and the edges in double red lines; folios numbered in both margins; fol. 110b blank; complete; the Ms. contains commentary on the 25th Adhyāya of the Kātyāyanaśrautasūtra.

At the beginning of the Ms. we have an index (foll. 1–10) of the several topics dealt with in the Ms.

Age — Śaka 1757

Author — Devayājñika

Begins — fol. 1*b*

श्रीगणेशाय नमः ॥ श्रीभुलेश्वराभ्या नमः ॥

दर्शपौर्णमासादीनि सप्तांतानि कर्माण्युक्तानि ॥ अधुना तेष्वेव कर्मसु कर्मविनाशे प्रायश्चित्तान्यभिधीयंते ॥ कर्मविनाशश्चतुःप्रकारः । अकरणं न्यूनकरणं अतिरिक्तकरणमयथाकरणं च अथवा एक एव प्रकारः ॥ etc.

Ends — fol. 304*a*

एक एव सौर्यः पशुः सर्वा वा दाशतयोरनुब्रूयाद्यावत्सूर्यो दृश्यते ॥ अस्मिन् पक्षे न सौर्यस्यालंभ इति ॥ चतुर्दशी कंडिका ॥ १४ ॥ छ ॥ इति त्रिंशत्क्रतुकृन्महायाज्ञिक - श्रीप्रजापतिसूतेन सम्राट्स्थपति-महायाज्ञिकश्रीदेवकृतायां कात्यायनसूत्रपद्धतौ पंचविंशतितमोध्यायः ॥ २५ ॥

शके १७५७ मन्मथनाम संवत्सरे माघमासं पंचम्यां तिथौ ॥ हस्ताक्षर रावजिमराळ-चांदवडकर वारतब्य पुणे जुना कसबा श्रीगणपति सन्निध ॥ एवं पुस्तकं संपूर्णं शुभं भवतु ॥

हे पुस्तक सखाराम बाबाजी अग्नोत्री वेवहारि ॥
कल्याणगस्तु ॥ श्रीरस्तु ॥ छ० ॥

Reference — See No. 68(i)/1887–91.

कात्यायनश्रौतसूत्र-पद्धति

Kātyāyanaśrautasūtra-paddhati

No. 138

92
1884–86

Size — 8⅜ in. by 5⅛ in

Extent — 64 leaves; 10–12 lines to a page; 25 letters to a line.

Description—Country paper; Devanāgarī characters; old in appearance; handwriting of folios 1–31 careless but from fol. 32 onwards beautiful, clear, legible and uniform; borders of folios 32 to 64 ruled in double red lines; edges slightly worn out; fol. 4*a*

blank; folios numbered in right-hand margins; some of the folios moth-eaten; the Ms. contains the 4th Adhyāya only.

Age — Saṁvat 1781

Author — Devayājñika, son of Prajāpati

Begins — fol. 1b

॥ श्रीगणेशाय नमः ॥

पौर्णमासेष्टिरुक्ता ॥ अथ दर्शेष्टिरुच्यते ॥

तत्र चतुर्दश्यां रात्रौ सायं प्रातर्दध्ना होमो नान्यथा ॥ अमावास्यायां पंचभूसंस्कारपूर्वकं पूर्वान्ह एवाग्न्योद्धरणं । ततोऽग्न्यन्वाधानं । ततो मांसमैथुन-संकल्पः । वपनं वा । ततो वैश्वदेवः । ततोपरान्हे पिंडपितृयज्ञः । ततो दर्शश्राद्धं । etc.

Ends — fol. 64a

उन्मादे प्रसवे चर्त्तौ कुर्वीतानुज्ञया विना ।
सर्वदा यजमानो वा त्यजेत्तद्विमुखः शुचिरिति ।

तथा चापस्तंबः । प्रवसन्विराभिमुखो याजमानं जपति । प्रांचो विष्णु-क्रमान् क्रामतीति ॥

मंडनत्यागं तु सर्वथा कुर्यात्तथाप्यन्यतरस्तयोः ।
उभावप्यसमर्थौ चेत् नियुक्तः कश्चन्यत्येत् ॥

इति पंचदशी कंडिका ॥ १५ ॥

इति त्रिरग्निचित्सम्राडस्थपति - याज्ञिकप्रजापतिसुतयाज्ञिकश्रीदेवकृत-कात्यायनपद्धतौ चतुर्थोध्यायः समाप्तः ॥ श्रीरस्तु । संवत् १७८१ वर्षे कार्त्तिक-मासे शुक्लपक्षे १३ सोमे समाप्तिमगमत् ॥ छ ॥ छ ॥ छ ॥

कात्यायनश्रौतसूत्र-पद्धति

Kātyāyanaśrautasūtra-paddhati

No. 139 93 / 1884–86

Size — 11⅛ in. by 4½ in.

Extent — 48 leaves; 12 lines to a page; 38 letters to a line.

Description — Country paper; Devanāgarī characters; old and yellowish in appearance; handwriting small and closely written but clear and legible; borders ruled in double black lines; yellow pigment used for corrections; edges worn out; Ms. extremely

moth-eaten; folios numbered in both margins; foll. 1–25 missing; the Ms. contains commentary on the 3rd and 4th Adhyāyas of the Kātyāyanasūtra.

Age — Saṁvat 1625

Author — Yājñikadeva, son of Prajāpati

Begins abruptly — fol. 26*b*

... मत्रे अयं विशेषः। ततः स्रुवेण सर्वाणि कपालान्याज्येनाभ्यनक्ति। उपधानक्रमेण तूष्णीं। etc.

fol. 26*a* इति श्रीत्रिरग्निचित्संम्राट्स्थपतित्रिशक्रतुकृन्महायाज्ञिकश्रीप्रजापतिसुत-याज्ञिकदेवकृतायां कात्यायनसूत्रपद्धतौ द्वितीयोध्यायः॥

Ends — fol. 73*b*

तथा चापस्तंबः॥ ॥ प्रवसन्विहाराभि ... धो याजमानं जपति प्राचो विष्णुक्रमान् क्रामतीति॥ ॥ मंडनः।

त्यागं तु सर्वथा कुर्यात्तत्राप्यन्यतरस्तयोः
उभावप्यसमर्थौ चेन्नियुक्तः कश्चन त्यजेत्॥ १५॥

पंचदशी कंडिका च समाप्ता। ॥ इति त्रिरग्निचित्सम्राट्स्थपतित्रि-शक्रतुकृन्महायाज्ञिकश्रीप्रजापतिसुतेन याज्ञिकदेवकृतायां कात्यायनसूत्रपद्धतौ चतुर्थोध्यायः समाप्तः॥ ॥ संवत् १६२५ वर्षे भाद्रपदवदि ८ रवौ उदीच्य-ज्ञातीयकेशवेन लेखितं श्री शुभमस्तुः॥ श्रीः॥ ग्रथसंख्या २२००॥

कात्यायनश्रौतसूत्र-पद्धति

Kātyāyanaśrautasūtra-paddhati

No. 140 — 23 / 1886–92

Size — 9⅝ in. by 5¼ in.

Extent — 51 leaves; 11–15 lines to a page; 28–32 letters to a line.

Description — Country paper; Devanāgarī Characters; old in appearance; handwriting clear and legible but not uniform; borders ruled in double black lines; red pigment used for marking; yellow pigment used for corrections; white chalk also used; edges worn out; foll. 3*a*, 8*a*, 13*a*, 17*a* blank; the Ms, contains the 4th Adhyāya only.

Age — Appears to be very old

Author — Yājñikadeva

Begins — fol. 1b

श्रीगणेशाय नमः ॥

ततोऽपराण्हे पिंडपितृयज्ञः । ततो दर्शश्राद्धं । तदुक्तं ।

पक्षांतं कर्म निर्वर्त्य वैश्वदेवं च साग्निकः ।

पिंडयज्ञं प्रकुर्वीत ततो चाहार्यकं बुध इति ।

पक्षांतं कर्माऽग्न्वाधानं । अथ पिंडपितृयज्ञमुच्यते । etc.

Ends — fol. 26b (51b)

उन्मादे प्रसवे चर्त्तौ etc. up to चतुर्थोध्यायः as in No. 92/1884–86

कात्यायनश्रौतसूत्र-पद्धति

Kātyāyanaśrautasūtra-paddhati

No. 141

24
1886–92

Size — 8¼ in. by 5 in.

Extent — 14 leaves; 12 lines to a page ; 26 letters to a line.

Description — Country paper; Devanāgarī characters; not very old in appearance; handwriting careless but clear and legible; borders ruled in double black lines; red pigment used for marking; edges worn out and slightly moth-eaten; folios numbered in right-hand margins; the Ms. contains the first Adhyāya only.

Age — Saṁvat 1798

Author — Yājñikadeva, son of Mahādeva (?)

Begins — fol. 1b

श्रीगणेशाय नमः ॥

प्रणम्य विघ्नहर्त्तारं गुरुंश्च श्रीपतीस्तथा ।

कात्यायनस्य सूत्रस्य पद्धतिः क्रियते मया ।

तत्राग्न्याधेयादिसर्वकर्मसु ब्राह्मणक्षत्रियवैश्यानां अधीतवेदानां वेदार्थ-ज्ञानवतां अंगहीनाश्रोत्रियषंढशूद्रवर्जितानां पत्नीसहितानामधिकारो भवति । etc.

Ends — fol. 14b

रुद्रदेवतं रक्षोदेवतमसुरदेवतं अभिचारणिकं पितृदेवत्यं च मंत्रमुक्त्वा एतद्देवत्यममंत्रकं कर्म च कृत्वाऽत्मानमालभ्यापां स्पर्शनं हस्तेन कुर्यात् ॥ दशमी कंडिका ॥

इति श्रीयाज्ञिकदेवकृतायां कात्यायनसूत्रपद्धतौ आदिमोऽध्यायः समाप्तः ॥ ॥ श्री ॥ छ ॥

संवत् १७९८ वरषे पौषमासे शुक्लपक्षे दशम्यां तिथौ सोमवासरे ऽद्येह श्रीसूर्यपुरवास्तव्य - आभ्यंतरनागरज्ञातीय - ईश्वरजीदीक्षितेन लिषितं ॥ शिवमस्तु ॥ श्रीयज्ञपुरुषः प्रीयतां ॥ श्रीरस्तु ॥ ॥ ॥

कात्यायनश्रौतसूत्र-पद्धति

Kātyāyanaśrautasūtra-paddhati

No. 142

25(1)
1886–92

Size — 8⅓ in. by 4¾ in.

Extent — 30 leaves; 9 lines to a page; 25 letters to a line.

Description — Country paper; Devanāgarī characters; not very old in appearance; handwriting bold, clear, legible and uniform; folios numbered in right-hand margins; the Ms. is divided into two parts. The first part contains the commentary on the 2nd Adhyāya of the Kātyāyanasūtra and the second contains the commentary on the 3rd Adhyāya; separate pagination for each.

Age — Saṁvat 1868

Author — Yājñikadeva, son of Prajāpati

Begins — fol. 1*b*

॥ श्रीगणेशाय नमः ॥

अथ दर्शपौर्णमासयोः पद्धतिर्लिख्यते ॥

कृताधानस्याधानानंतरं ॥ प्रथमपौर्णमास्यां मातृपूजापूर्वकमाभ्युदयिकं श्राद्धं ॥ ततो मुख्यायामेव पौर्णमास्यां सद्योन्वारंभणीयेष्टिः तदनंतरं पौर्णमासस्यारंभः ॥ etc.

Ends — fol. 30*a*

ततोऽध्वर्युः पाहि मामिति स्वात्मानं हृदये आलभते ॥ तत उदकोपस्पर्शनं ॥ अस्मिन्काले वा यजमानस्य व्रतग्रहणं ॥

इति श्रीत्रिरश्मिचत्संम्राट्स्थपति-त्रिशत्क्रतुकृन्महायाज्ञिकश्रीप्रजापतिसुतदेवकृतायां कात्यायनसूत्रपद्धतौ द्वितीयोध्यायः ॥ संवत् १८६८ प्रथमवैशाख-

शुक्ल ५ गुरौ दीक्षितसदाशंकरात्मज-भद्रशंकरेणालेखि ॥ त्रिपाठी-हरीनारायण-सुत-गिरिजाशंकरपठनार्थं

कात्यायनश्रौतसूत्र-पद्धति

Kātyāyanaśrautasūtra-paddhati

No. 143

26
1886–92

Size — 8⅓ in. by $4\frac{13}{16}$ in.

Extent — 96 leaves; 9 lines to a page; 24 letters to a line.

Description — Country paper; Devanāgarī characters; not very old in appearance; handwriting clear, legible and uniform; borders ruled in double red lines; folios numbered in the right-hand margins only; fol. 66*b* blank; edges slightly worn out; moth-eaten; the Ms. contains the 5th Adhyāya only.

Age — Saṁvat 1869.

Author — Yājñikadeva, son of Prajāpati.

Begins — fol. 1*b*

॥ श्रीगणेशाय नमः ॥

अथ चातुर्मास्यानां पद्धतिर्लिख्यते ॥

तत्र प्रथमप्रयोगे मातृपूजापूर्वकं आभ्युदयिकं श्राद्धं ॥ तेषामारंभः फाल्गुन्यां पौर्णमास्यां वा ॥ शाखांतराच्चैत्र्यां वैशाख्यां वा ॥ तत्र पौर्णमास्यां इच्छयान्वारंभणीया ॥ etc.

fol. 12*a* इति श्रीयाज्ञिकश्रीदेवकृतपद्धतौ वैश्वदेवपर्व समाप्तं ॥

fol. 39*b* इति याज्ञिकश्रीदेवकृतौ कात्यायनकपद्धतौ वरुणप्रघासाः समाप्ताः ॥

fol. 72*a* इति त्रिरग्निचित्सम्राट्स्थपतिमहायाज्ञिकश्रीप्रजापतिसुतयाज्ञिकदेवकृतौ कात्यायनसूत्रपद्धतौ ऐष्टिकानि प्रतिपर्व चातुर्मास्यानि समाप्तानि । छ ॥

Ends — fol. 95*b*

आज्यभागानंतरं अग्निः सोमो वरुणो मित्र इंद्रो बृहस्पतिः सविता पूषा सरस्वती त्वष्टा । उपांशु । हविरजुषंतावीवृधंत महो ज्यायोक्रत देवा आज्यप इत्यादि ॥ छ ॥ त्रयोदशी कंडिका ॥

इति त्रिरग्निचित्संम्राट्स्थपति-महायाज्ञिकश्रीप्रजापतिसुत-याज्ञिकदेव-कृतायां कात्यायनपद्धतौ पंचमोध्यायः समाप्तः ॥ ॥ संवत् १८६९ वर्षे ज्येष्ठ-सित दशम्यां भूमिजे लिखितं सूर्यपुरे ईनजातटे वृद्धनगरस्थनागरज्ञातीय-दीक्षितसदाशंकरतनुजेन भद्रशंकरेण ॥ शिवो जयतु ॥

॥ श्लोकसंख्या १२७८ ॥

कात्यायनश्रौतसूत्र-पद्धति — Kātyāyanaśrautasūtra-paddhati

No. 144 — 64 / 1887–91

Size — 9¼ in. by 4$\frac{1}{16}$ in.

Extent — 16 leaves; 8 lines to a page; 32 letters to a line.

Description — Country paper; Devanāgarī characters; not very old in appearance; handwriting clear, legible and uniform; borders ruled in two double black lines; red pigment used for marking the portion; yellow pigment used for corrections; folios numbered in both margins; edges slightly worn out and moth-eaten; folios stuck together; the Ms. contains the commentary on the 10th Adhyāya of Kātyāyanaśrautasūtra.

Age — Does not appear to be very old.

Author — Devayājñika.

Begins — fol. 1^b

श्रीगणेशाय नमः ॥

अथाऽत्यग्निष्टोमो लिख्यते ॥ तत्र हिरण्यशतगवदक्षिणेन वासोश्वदक्षिणेन चतुष्टोमेन रथंतरपृष्ठेनाऽत्यग्निष्टोमसंस्थेन ज्योतिष्टोमेनाहं यक्ष्य etc.

Ends — fol. 16^a

तत्र प्रतिपर्यायारंभं सर्पणं ॥ ततः सर्पणं ॥ संधिस्तोत्रं । तत आश्विन-शस्त्रं । सोमस्य परिशेषांगं । सूर्योदयानंतरं चतुर्थो रात्रिपर्यायः ॥ तत्र च प्रतिस्तोत्रं सर्पणं ॥ अन्यत्सर्वं रात्रिपर्यायवत् । इदमश्विभ्यामिदमग्नय इति त्यागौ । ततोऽनुयाजादि । इत्यसोर्यामः ।

इति याज्ञिकदेवकृतसूत्रपद्धतौ दशमोध्यायः ॥ अथ सोमे ब्रह्मत्वमुच्यते ॥

अथ सर्वपृष्ठासोर्यामः ॥ तत्र सर्वस्तोमो नाम यस्मिन् कृतौ त्रिवृदादयस्त्रय-स्त्रिंशत्पर्यंताः षडहस्तोत्रिया भवंति स सर्वस्तोमेत्युच्यते । तथा च त्रिवृत्पंच-

दशसप्तदशैकविंशत्रिणवत्रयस्त्रिंशस्तोमाः ॥ सर्वपृष्ठशब्देन रथंतरादीनि रैवत-पर्यंतानि षट् सामानि यस्मिन्भवंति स सर्वपृष्ठ इत्युच्यते ॥ तथा च रथंतर-बृहत्वैरूपशाकररैवतेति षट् पृष्ठाः ॥

Reference — See No. 68(i)/1887–91.

कात्यायनश्रौतसूत्र-पद्धति

Kātyāyanaśrautasūtra-paddhati

No. 145

12
1895–98

Size — 8¼ in. by 5¾ in

Extent — 585 leaves; 12–14 lines to a page; 20–25 letters to a line.

Description — Country paper; Devanāgarī characters; not very old in appearance; handwriting somewhat careless and not uniform but clear and legible; borders of some folios carelessly ruled in double black lines and of some folios in double red lines; edges worn out and moth-eaten; the Ms. contains Adhyāyas 1–4, 5, 7, 11, 13, 14, 15, 16–18. 20, 21, 22, 23 and 24 and folios numbered as 1–85, 1–65, 1–28, 1–24, 1–44, 1–22, 2–22, 1–91, 1–43, 1–25, 1–54, 1–19, 1–64; foll. 33, 34 of 3rd Adhyāya and fol. 1 of the 15th Adhyāya missing while foll. 15 and 16 of 22nd Adhyāya are repeated; incomplete.

Age — Saṁvat 1782, 1788. At the end of the 5th colophon, the date of the Ms. is given as Saṁvat 1752 but at the end of the Ms. the date is given as Saṁvat 1788.

Author — Yājñikadeva

Begins — fol. 1b

ॐ श्रीगणेशाय नमः ॥

प्रणम्य विघ्नहर्त्तारं गुरुंश्च श्रीपतीं तथा ।
कात्यायनस्य सूत्रस्य पद्धतिः क्रियते मया ॥ १ ॥

तत्राग्न्याधेयादिसर्वकर्मसु ब्राह्मणक्षत्रियवैश्यानामधीतवेदानां वेदार्थ-ज्ञानवतां अंगहीनाश्रोत्रियषंढशूद्रवर्जितानां पत्नीसहितानामधिकारो भवति ॥ etc.

fol. 13b दशमी कंडिका ।' इति श्रीत्रिरग्निचित्संम्राटस्थपतिमहायाज्ञिकप्रजापति सुत्याग्निकदेवकृतायां कात्यायनसूत्रपद्धतौ प्रथमोध्यायः समाप्तः ॥

fol. 65b (150b) इति याज्ञिकदेवकृतसूत्रपद्धतौ पंचमोध्यायः ॥ ५ ॥ संवत् १७८२ शाके १६४७ प्रवर्त्तमाने उत्तरायने भानौ वसंतऋतौ चैत्रमासे शुक्लपक्षे ११ शनिवासरे लिखितं जोशी-लालतीत्रवाडी मेवाडा ॥ आ पुस्तक दीक्षितजीश्रीरविनंदनजी नु छै ।। शुभमस्तु ॥ लेखकपाठकयोः ॥

Ends — fol. 64a

एवं विधेः पंचभिरहोभिः प्रतिमासं षडवारमभ्यस्तैकरुद्रशन्षण्मासान्पूरयेत् । अस्यत्रस्य नारायणपुरुषसत्रमित्येव संज्ञा ॥ इति सत्राणि समाप्तानि ॥ ७ ॥ सप्तमी कंडिका ॥ इति श्रीसंम्राटस्थापतित्रिरग्निचित्त्रिंशत्क्रतुकृन्महायाज्ञिकश्रीप्रजापतिसुतेन याज्ञिकदेवेन कृतायां कात्यायनसूत्रपद्धतौ चतुर्विंशोध्यायः समाप्तः ॥ संवत् १७८८ वर्षे फाल्गुणवदि १ बुधे श्रीमुथुरांमंडलश्रीभूतेश्वरक्षेत्रे लिखितं ॥ दीक्षश्री ५ रविनंदनकस्य॥ पुस्तिका पुत्रपौत्रादिपठनार्थे ॥ लि । वो । प्रांगजी सोरठी ॥

Reference — See No. 68(1)/1887–91.

कात्यायनश्रौतसूत्र-पद्धति

Kātyāyanaśrautasūtra-paddhati

No. 146

13
1895-98

Size — $8\frac{3}{8}$ in. by $6\frac{1}{16}$ in.

Extent — 109 leaves; 12 lines to a page; 28 letters to a line.

Description — Country paper; Devanāgarī characters; old in appearance; handwriting bold, clear, legible and uniform; borders ruled in single black lines; folios numbered in both margins; edges slightly worn out; the Ms. contains Adhyāyas 8 and 9 and a chapter called ' Agniṣṭoma '.

A commentary on Kātyāyanasūtra.

Age — Appears to be old

Author — Yājñikadeva, son of Prajāpati

Begins — fol. 1b

ॐम् ॥ अथातिथ्येष्टिः ।:

॥ तत्र वैष्णवो नवकपालः पुरोडाशो भवति ॥

अत्रातित्वरया पदार्थाः कार्यं चनुरासनं ॥ ब्रह्मोयवेशनं ॥ प्रणीताप्रणयनं ॥ आवाहनीयस्यैव परिस्तरणं ॥ etc.

fol. 41b इति श्रीरग्निचित्सम्राटस्थपतिमहायाज्ञिक - श्रीप्रजापतिसुतयाज्ञिकदेवकृतायां कात्यायनसूत्रपद्धतौ अष्टमोध्यायः समाप्तः ॥

fol. 80b इति याज्ञिकदेवकृतायां सूत्रपद्धतौ नवमोध्यायः ।

Ends — fol. 109a

तदानीसेवपृनरुद्धत्य स्वयमेवाग्निहोत्रहोमः । प्रातर्होमस्तुस्वकाल एव ॥ अनऊर्द्धं सधातर्पण वैश्वदेवादि नित्यक्रिनोतः प्राक् ॥ श्री ॥ इति त्रिरग्निचिमहायाज्ञिकश्रीप्रापतिसतयाज्ञिकदेवकृतायां कात्यायनसूत्रपद्धतावग्निष्टोमः समाप्तः ॥ ॥ शुभं भवतु ॥ श्री ॥ श्री ॥ श्री ॥

कात्यायनश्रौतसूत्र-भाष्य

Kātyāyanaśrautasūtra-bhāṣya

No. 147

137 / 1880–81

Size — 11¼ in. by 5 in.

Extent — 52 leaves; 11 lines to a page; 32 letters to a line.

Description — Country paper; Devanāgarī characters with पृष्ठमात्राs; old in appearance; handwriting somewhat careless but clear, legible and uniform; borders ruled in double black lines; red pigment used for marking; yellow pigment used for corrections; extremely moth-eaten; folios numbered from 939–990 in the right-hand margins and from 1–52 in the left; the Ms. contains text and commentary on the 12th Adhyāya of the Kātyāyanaśrautasūtra.

Age — Saṁvat 1651

Author of Text — Kātyāyana
,, ,, Comm. — Devayājñika

Begins (Text) — fol. 1b (993b)

ज्योतिष्टोमधर्मा एकाहद्वादशयोस्तद्गुणदर्शनात् । etc

Begins (Comm.) — fol. 1b (939b)

॥ ॐ नमः सरस्वत्यै । नमो गजवदनाय ॥

॥ ज्योतिष्टोम उक्तः। इदानीं श्रुतिमंत्रपाठक्रमप्राप्तो द्वादशाहोभिधीयते। तत्र श्रुतिपाठक्रमः। सर्वे ह वै देवा अग्रे सदृशा आसुरित्यत्र ब्राह्मणेतिग्राह्यत्रिधानं द्वादशाहे तान्वै पृथ्ये षडहे गृण्हीयादिति। तथा ज्योतिष्टोममंत्रानंतरं अग्ने पवस्व स्वपा इत्यादयोतिग्राह्यमंत्राः। तत्र तावद्धर्मातिदेशार्थमाह ॥ etc.

Ends (Text) — fol. 989*a*

कालो वचनात् etc.

Ends (Comm.) — fol. 989*b*

य आहिताग्नयो भवंत्यथ येनाहिताग्नयो गृहपतिमेव त उपासते सकाममेव पृष्ठशमनीयेन यजते कामं न यजते यदि तु यज्ञेनैत एवास्यासत्रेण ऋत्विजः स्युरित्यारण्यके ॥ ९ ॥ छ ॥

इति श्रीत्रिरग्निचित्सम्राटस्थपतिमहायाज्ञिकश्रीश्रीप्रजापतिसुतेन द्विरग्निचित्सम्राटस्थपतिमहायाज्ञिकश्रीश्रीदेवेन कृते कात्यायनसूत्रव्याख्याने द्वादशोध्यायः ॥ छ ॥

स्वस्ति श्रीमत्संवत् १६५१ वर्षे कार्त्तिकमासे शुक्लपक्षे ४ चतुर्थ्यां तिथौ सोमवासरेऽद्येह श्रीमत्स्तंभतीर्थे वास्तव्य श्रीगौडज्ञातिभूषणद्विरग्निचित्समाटस्थपतिमहायाज्ञिकदीक्षितश्रीश्रीनृसिंह – तत्सुतद्विरग्निचित्समाटस्थपतिमहायाज्ञिकदीक्षितश्रीश्रीजयदेवस्य स्वयमेवावलोकनाय चान्ये जी विद्वज्जनानामुपकाराय लिखापितोयं द्वादशोऽध्यायः ॥ छ ॥ श्रीः ॥

अपरं पुस्तकं वीक्ष्य शोधनीयं सदा बुधैः।
हीनाधिकैः स्वरैर्वर्णैरस्माकं दूषणं न हि ॥ छ ॥
यादृशमिति न्यायात्र मे दोषः ॥ छ ॥ छ ॥

Reference — See No. 68(i)/1887–91.

कात्यायनश्रौतसूत्र-
भाष्य
(कातीयसूत्रभाष्य)

Kātyāyanaśrautasūtra-
bhāṣya
(Kātīyasūtrabhāṣya)

No. 148

68
A/1881–82

Size — 12⅝ in. by 5 in.

Extent — 314 leaves; 9 lines to a page; 40–42 letters to a line.

Description — Thick country paper; Devanāgarī characters; not very old in appearance; handwriting clear, legible and uniform; red pigment used for marking; yellow pigment used for correc-

tions; folios numbered in both margins; the Ms. contains the text and the commentary. It contains the पूर्वार्द्ध or Adhyāyas 1–11.

Age — Saṁvat 1837

Author of Text — Kātyāyana
,, ,, Comm. — Karkopādhyāya

Begins (Text) — fol. 1b

अथातोधिकारः etc.

Begins (Comm.)— fol. 1b

॥ श्रीगणेशाय नमः ॥

त्रयीसुसंवित्तिविवेकनिर्म्मलाः समग्रनिःश्रेयससिद्धिहेतवः ॥
समस्तशास्त्रार्थसुतत्वबोधका जयन्ति कात्यायनपादपांसवः ॥ १ ॥

अथातोधिकारः ॥ व्याख्यास्यत इति सूत्रशेषः ॥ शास्त्रप्रयोजनं संबंधाभिधानं दर्शपूर्णमासादौ कृतं इदानीं पदार्थमात्रव्याख्यानं क्रियते ॥ etc.

fol. 44b इति उपाध्यायकर्ककृतौ कात्यायनसूत्रविवरणे परिभाषा समाप्ता ॥ १ ॥

Ends (Text) — fol. 31a

स्वꣳ मितरे स्वꣳ मितरे

Ends (Comm.) — fol. 313b

विसꣳ स्थितसंचरः प्रशास्तृधिष्ण्यं वोतरेणावमाने ॥ विसꣳ स्थितसंचरः । अपरिसमाप्तसवनसंचरः अपवमाने प्रशास्त्रधिष्ण्यवोतरेणेति । वा दक्षिणेन ॥ पवमानार्थं तु समाप्तेव सवने दक्षिणेनैवति ॥ स्वꣳ स्वमितरे इतरे पुरुषा यथास्वं धिष्ण्यानेवमेवागंच्छंति ॥ उपाध्यायकर्ककृतौ कातीयसूत्रभाष्ये ज्योतिष्टोमः ॥ समाप्तः एकादशोध्यायः ॥ समाप्तः पूर्वार्द्धं समाप्तमिति ॥ श्रीरस्तु ॥ शिवमस्तु सर्वजगतः ॥ छ ॥ छ ॥ छ ॥ संवत् १८३७ अगहनसूकलपक्षे ६ बुधवासरे ॥ श्रीमस्तु ॥ छ ॥ छ ॥ छ ॥ छ ॥

Reference — See No. 370/1883–84.

कात्यायनश्रौतसूत्र-भाष्य

Kātyāyanaśrautasūtra-bhāṣya

No. 149

69
A/1881–82

Size — 10⅞ in. by 4½ in.

Extent — 186 leaves; 11 lines to a page; 32 letters to a line.

Description—Country paper; Devanāgarī characters; old in appearance; handwriting somewhat careless but clear, legible and uniform; borders ruled in double black lines; red pigment used for marking; edges slightly worn out; moth-eaten; folios numbered in the right-hand margins only; fol. 101 missing; the Ms. contains both text and commentary. It contains Adhyāyas 12–26.

Age — Saṁvat 1669

Author of Text — Kātyāyana
„ „ Comm. — Karkopādhyāya

Begins (Text) — fol. 1[b]

ज्योतिष्टोमधर्मा एकाहद्वादशाहयो etc.

Begins — (Comm.) fol. 1[b]

॥ ॐ नमो यजुर्वेदाय ॥

इदानीं श्रुतिमंत्रावसरप्राप्तौ द्वादशाहोनुविधीयते ॥ तत्र श्रुतिपाठः ॥ सर्वे ह वै देवा अग्रे सदृशा आसुरित्यतिग्राह्यग्रहविधानं द्वादशाहे ॥ तान् वै पृष्टे षडहे गृण्हीयात् । पूर्वे त्र्यह इत्येवमादिः । etc.

fol. 13[b] कर्कोपाध्यायकृते कात्यायनभाष्ये द्वादशाह समाप्तः ॥ छ ॥

fol. 19[b] उपाध्यायकर्ककृतौ कात्यायनभाष्ये गवामायनः समाप्तः । छ ॥

Ends (Text) — fol. 187[a]

स्वाध्यायदर्शनात् ।

Ends (Comm.) — fol. 187[a]

एतच्च द्वारापिधानोत्तरकालं पूर्वम् । पूर्वमासंद्यां करोतित्यतः प्रागत्यं । समाप्ते हि प्रवर्ग्ये पुनः क्रियते तत्र क्रियमाणमुत्तरार्थं भवति ॥ स्वाध्याय-दर्शनादिति ॥

इति कात्यायनसूत्रभाष्ये उपाध्यायकर्ककृतौ षड्विंशतिमोध्यायः ॥ शुभ-मस्तु ॥ संवत् १६६७ वर्षे श्रावणशुदि १३ सोमे लखितं ॥ कर्कभाष्य समाप्तः ॥ ॥ श्रीः ॥

Reference — See No. 378/1883–84.

कात्यायनश्रौतसूत्र-भाष्य

Kātyāyanaśrautasūtra-bhāṣya

No. 150

503(1)
1882–83

Size — 11⅝ in. by 4⅛ in.

Extent — 37 leaves; 9 lines to a page· 40 letters to a line.

Description — Modern paper with watermarks; Devanāgarī characters; new in appearance; handwriting clear, legible and uniform; red pigment used for marking; yellow pigment used for corrections; folios numbered in both margins; fol. 42 blank; foll. 3–7 missing; the Ms. is divided into two parts, the first part contains the text and the commentary on the 1st Adhyāya of Kātyāyanasūtra and the second contains text and commentary on the third and fourth Adhyāysa; separate pagination for each part.

Age — Śaka 1717

Author of Text — Kātyāyana
„ „ Comm. — Not mentioned

Begins (Text) — fol. 1b

अथातोधिकारः । फलयुक्तानि कर्माणि etc.

Begins (Comm.) — fol. 1b

॥ श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुभ्यो नमः ॥
श्रीकुलदेवताभ्यो नमः ॥

प्रणतसुरासुरभासुरकिरीटकोटिप्रभृष्टचरणाय ॥
गजवदनाय नमस्ते सिद्धेः सदनाय विघ्नकदनाय ॥ १ ॥.....

भाष्याणि सम्यगालोच्य विचार्य च पुनः पुनः ॥
क्रियते बालबोधार्थं सूत्रभाष्यमतिस्फुटं ॥ ५ ॥ etc.

Ends (Text) fol. 41b

रौद्रराक्षसमासुरमाभिचरणिकं मंत्रमुक्त्वा पित्र्यमात्मानं चालभ्योपस्पृशेदप उपस्पृशेदप

Ends (Comm.) — fol. 41b

रौद्रादिकं मंत्रमुक्त्वा पठित्वा पितृदैवत्यं मंत्रमुक्त्वा चकाराद्रौद्रदैवत्यममंत्रकं कर्म कृत्वा आत्मानं चालभ्याप उदकानि उपस्पृशेदालभेत क्वचित्पात्रे

स्थित पो हस्तेन स्पृशतीत्यर्थः ।। द्विरभ्यासोध्यायपरिसमाप्तिसूचनार्थः ॥ १० ॥
इति कात्यायनसूत्रभाष्ये प्रथमोध्यायः समाप्तः ॥

शके १७१७ राक्षसनाम संवत्सरे आषाढवद्य ४ चतुर्थी रविवासरे तद्दिने इदं पुस्तकं समाप्तिकृतं ॥ श्रीगजाननार्पणमस्तु ॥

सधूमश्च विधूमश्च सगर्भश्चाप्यगर्भकः ॥
सलक्षश्चाप्यलक्षश्च प्राणायामस्तु षड्विधः ॥
सधूमः श्वासयुक्तो विधूमः श्वासवर्जितः ॥
सगर्भो जपसंयुक्तो ह्यगर्भो ध्यानमात्रकः ॥ ॥

कात्यायनश्रौतसूत्र-भाष्य

Kātyāyanaśrautasūtra-bhāṣya

No. 151

503(2)
1882–83

Size — 11⅝ in by 4⅛ in.

Extent — 61 leaves· 9 lines to a page; 44 letters to a line.

Description — Modern paper with watermarks; Devanāgarī characters; new in appearance; handwriting clear, legible and uniform; red pigment used for marking; folios numbered in right-hand margins; the Ms. contains the text and commentary on the third and fourth Adhyāyas of Kātyāyanasūtra.

Age — Śaka 1717

Author of Text — Kātyāyana

,, ,, Comm. — Not mentioned

Begins (Text) — fol. 1[a]

होतरिति चैके etc.

Begins (Comm.) — fol. 1[a]

..... रं प्रत्याह । ब्रवीति ।। ।। होतरिति चैके ।। एके शाखिनोऽग्रये समिध्यमानाय होतरनुब्रूहीत्येवंविधं प्रैष कुर्वंति ।। प्रथमस्थानेन प्राक् स्विष्टकृतः ।। स्विष्टकृतः प्राक् सर्वे मंत्राः प्रथमस्थानेन प्रयोक्तव्याः । etc.

fol. 18[b] इत्यतिकात्यायनसूत्रभाष्ये तृतीयोध्यायः ॥

Ends (Text) — fol. 61[b]

उपवसथे नियम उपवसथे नियमः ।

Ends (Comm.) — fol. 61ᵇ

अतश्च सूतकेपि तत्कालमेव स्नात्वा स्वयमेव होमः कार्यः। नियमसामर्थ्यात् ॥ श्रौते कर्मणि तत्कालं स्नातः शुद्धिमवाप्नुयादिति वचनाच्च ॥ द्विरभ्यासोध्यायपरिसमाप्तिसूचनार्थः ॥

इतिकात्यायनसूत्रभाष्ये चतुर्थोध्यायः समाप्तः ॥

———

कात्यायनश्रौतसूत्र-भाष्य

Kātyāyanaśrautasūtra-bhāṣya

No. 152

506
1882–83

Size — 11¼ in by 4⅛ in.

